# P. R. THAKUR GOVT. COLLEGE

B.A. Honours Paper-III

CBSE SEMESTER – III

CC-6-1 (SANADSE06T)

**TARAK MAJUMDER**

| **अलंकारः** | **लक्षणम्** | **उदाहरणम्** |
|---|---|---|
| अनुप्रास | अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत् | |
| | छेको व्यञ्जनसङ्घस्य सकृत्साम्यमनेकथा | आदाय वकुलगन्धानन्धीकुर्वन् पदे पदे भ्रमरान्।<br>अयमेति मन्दमन्दं कावेरीवारि पावनः पवनः।। |
| | शब्दार्थयो पौनरुक्त्यं भेदे तात्पर्यात्रतः<br>लाटानुप्रास इत्युच्यते। | स्मेरराजीवनयने नयने किं निमीलिते।<br>पश्य निर्जितकन्दर्पं कन्दर्पवशगं प्रियम्।। |
| यमक | सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।<br>क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते।। | नवपलाश-पलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।<br>मृदुलतान्तलतान्मलोकयत् स सुरभिं सुरभिं सुमनोहरैः।। |
| श्लेषः | श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते | प्रतिकूलतामुपागते हि विधौ विफलत्वमेति बहुसाधनता।<br>अवलम्बनाय दिनभर्तुवभून्न पतिष्यतः करसहस्रमपि।।<br><br>येन ध्वस्तमनोभवेन बलिजित्कायः पुरा स्त्रीकृतो<br>यश्चोद्वृत्तभुजङ्गहारबलयो गङ्गाञ्च योऽधारयत्।<br>यस्याय शशिमच्छिरो हर इति स्तुत्यञ्च नानामरा<br>पायात् स स्वयमन्धकक्षयकरस्त्वां सर्वदो माधवः। |
| उपमा | साम्यं वाच्यमवैधर्म्यं वाक्यैक्ये **उपमा** द्वयोः | पूर्णोपमा<br>मधुरः सुधावदधरः पल्लवतुल्योऽतिपेलवः पाणिः।<br>चकितमृगलोचनाभ्यां सदृशी च चपले लोचने तस्याः।। |
| | **मालोपमा** यदेकस्योपमाने बहु दृश्यते | मालोपमा<br>वारिजेनेव सरसी शशिनेव निशीथिनी।<br>यौवनेनेव वनिता नयेन श्रीर्मनोहरा।। |
| | पर्यायेन द्वयोरेतदुपमेयोपमा मता | उपमेयोपमा<br>कमलेव मति मतिरिव कमला तनुरीव विभा विभेव तनुः<br>धरणीव धृति धृतिरिव धरणी सततं विभाति वत यस्य।। |
| रूपक | रूपकं रूपितारोपो विषये निरपह्नवे | मालारूपकम्-<br>पद्मोदयदिनाधीशः सदागतिसमीरणः।<br>भूभृदाबलिदम्भोलिरेक एव भुवान् भुवि। |
| | यत्र कस्यापि आरोपः परारोपणकारणं<br>तत् परम्परितम् | आहवे जगद्दुदण्डः राजमण्डलराहवे।<br>श्रीनृसिहं महीपाल स्वस्त्यस्तु वाहवे।। |

| | | |
|---|---|---|
| | निरङ्गं केलस्यैव रूपणम् | दासे कृतागसि भवत्युचितं प्रभूनां<br>पादप्रहार इति सुन्दरि नात्र दुये।<br>उद्यत् कठोर-पुलकाङ्कुर-कण्टकाग्रैः<br>यद् भिद्यते मृदुपदं ननु सा व्यथा मे।। |
| उत्प्रेक्षा | भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना | वाच्योत्प्रेक्षा<br>ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।<br>गुणा गुणानुबन्धित्वात् तस्य स प्रसवा इव।।<br>प्रतीयमानोत्प्रेक्षा<br>तन्वङ्ग्याः स्तनयुग्मेन मुखं न प्रकटीकृतम्।<br>हाराय गुणिने स्थानं न दत्तमिति लज्जया।। |
| सन्देह | सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थितः | अयं मार्तण्डः किम् स खलु तुरगैः स्पतभिरितः<br>कृशानु किम् सर्वाः प्रसरति दिशो नैशो नियतम्।<br>कृतान्तः किं साक्षात् महिषवाहनोऽसाविति चिरं<br>समालोक्याजौ त्वां विदधति विकल्पान् प्रतिभटाः।।<br><br>स्वप्नो नु माया नु मतिभ्रमो नु<br>क्लिष्टं न तावत्फलनेव पुण्यम्।<br>आसन्नवृत्तै तदतीतमेते<br>मनेरथा नाम तटप्रपाताः।। |
| भ्रान्तिमान | साम्यादतस्मिंस्तद्बुद्धिर्भ्रान्तिमान् प्रतिभोत्थितः | मुग्धा दुग्धधिया गवां विदधते कुम्भनधो वल्लवाः<br>कर्णे कैरवशङ्कया कुवलयं कुर्वन्ति कान्ता अपि।<br><br>गर्जन् हरिः साम्भसि शैलकुञ्जे<br>प्रतिध्वनीनात्मकृतान्निशम्य।<br>क्रमं वबन्ध क्रमितुं सकोपः<br>प्रतर्कयन्नन्यमृगेन्द्रनादान्।। |
| अतिशयोक्तिः | सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते | यदि स्यान्मण्डले सक्तमिन्दोरन्दीवरद्वयम्।<br>तदोपमीयते तस्या वदनं चारुलोचनम्।। |
| स्वभावोक्तिः | स्वभावोक्तिर्दुरूहार्थस्वक्रियारूपवर्णनम् | कण्ठे कालः करस्थेन कपालेनेन्दुशेखरः।<br>जटाभिः स्निग्धताम्राभिरविरासीद्-वृषध्वजः।।<br><br>ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः<br>पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्। |
| विरोधाभास | जातिश्चतुर्भिर्जात्याद्यैर्गुणो गुणादिभिस्त्रिभिः।<br>क्रिया क्रियाद्रव्याभ्यां यद् द्रव्यं द्रव्येण वा मिथः।<br>विरुद्धमिव भासेत विरोधोऽसौ दशाकृतिः।। | अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः।<br>स्वपतो जागरुकस्य याथार्थ्यं वेद कस्तव।। |

| | | |
|---|---|---|
| परिसंख्या | प्रश्नादप्रश्नतो वापि कथिताद् वस्तुनो भवेत्।<br>तादृगन्यव्यपोऽश्चेच्छाब्द अर्थोऽथवा तदा।। | किमाराध्यं सदा पुण्यं कश्च सेव्यः सदागमः।<br>को ध्येयो भगवान् विष्णुः किं काम्यं परमं पदम्।।<br><br>भक्तिर्भवे न विभवे व्यसनं शास्त्रे न युवतिकामास्त्रे।<br>चिन्ता यशसि न वपुषि प्रायः परिदृश्यते महताम्।। |